श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री आपटीकर विरचितः

# ॥ श्रीरामचन्द्रस्तवः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामचन्द्रस्तवः ॥

सूर्यवंशसम्भवोऽपि चन्द्रकान्तिशीतलो
भूपतिस्तथापि निर्जितेन्द्रियो रघूत्तमः।
नीलनीरदाभकान्तिमीश्वरं धनुर्धरं
राघवं नमाम्यहं सदैव साधुसेवितम् ॥ 1 ॥

यज्ञरक्षणाय शैशवेऽपि राक्षसा हता
शम्भुचापभञ्जनेन जानकी त्वया वृता।
विष्णुकार्मुके शरं नियुज्य भार्गवो जित -
स्त्वां नमन्ति भक्तितः सुराः सदैव हे विभो ॥ 2 ॥

ताटका त्वया हता मदोद्धता महावने
दूषणादिदानवास्त्वया वने विनाशिताः।
तप्तकाञ्चनाभकान्तिभासुरो मृगो वने
प्रापितोऽन्तकान्तिकं शरेण राघव द्रुतम् ॥ 3 ॥

मेघनादकुम्भकर्णरावणादिराक्षसा
विक्रमेण लीलया त्वया हता रणाङ्गणे।
लोकरञ्जनाय जानकी विसर्जिता प्रिया
त्वां नमाम्यहं सदैव रामचन्द्र भूपते ॥ 4 ॥

एकबाणमेकवाक्यमेकभार्यकं विभो
त्वां स्तुवन्ति साधवो सदैव भक्तिचेतसा।
धर्मरक्षणाय काननं त्वयाऽऽश्रितं प्रभो
त्वामनन्यभक्तितश्च पूजयन्ति मानवाः ॥ 5 ॥

वानरेन्द्रवालिनाशकाय राम ते नमः
सिन्धुगर्वनाशकाय रामचन्द्र ते नमः।
वायुनन्दनादिवानरैः सदैव सेवितं
लक्ष्मणाग्रजं च जानकीपतिं नमाम्यहम्॥ **6**॥

त्यक्तयौवराज्यमार्जवेन युक्तमीश्वरं
व्याघ्रसर्पयुक्तकाननं गतं नृपेश्वरम्।
राजरत्नमालिकासु सुप्रतिष्ठितं नृपं
सादरं सदैव नौमि भक्तियुक्तचेतसा॥ **7**॥

त्वत्समो न भूपतिर्भुवि प्रभो विराजते
त्वत्समो सुतोऽपि देव नान्यतो हि दृश्यते।
प्रीतियुक्तमानसः पतिश्च नापरो जने
त्वामनन्यमानसो नमस्करोमि सन्ततम्॥ **8**॥

पापनाशिनीं तथैव सर्वकामदायिनीं
शक्तिकीर्तिमुक्तिदां स्मरेद् रघोः कथां सदा।
रामचन्द्रभूपतेः स्तवं सदैव यः पठेत्
तस्य तुष्टमानसो प्रभुर्दयामयो भवेत्॥ **9**॥

॥ श्रीरामचन्द्रस्तवः समाप्तः॥